कृष्णद्वैपायनो व्यासो विष्णुर्नारायणः स्वयम् ।
अपान्तरतमाः पूर्ब्बं स्वेच्छया ह्यभवद्धरिः ॥”
इति कौर्म्मे ४८ अध्यायः ॥

अपि च ।
“अनिरुद्धः स्वयं ब्रह्मा प्रद्युम्नः काम एव च ।
बलदेवः स्वयं शेषः कृष्णश्च प्रकृतेः परः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११६ अध्यायः ॥
(नड्वलागर्भजातो मनोरपत्यभेदः । यथा, भागवते । ४ । १३ । १५–१६ ।
“मनोरसूत महिषी विरजान् नड्वला सुतान् ।
पुरुं कुत्सं त्रितं द्युम्नं सत्यवन्तं त्रितं व्रतम् ॥
अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकम् ॥”)

प्रद्योतः, पुं, (प्रकृष्टो द्योतः ।) रश्मिः । इति हलायुधः ॥ (यक्षभेदः । यथा, महाभारते । २ । १० । १५ ।
“कर्णिरको गजकर्णः प्रद्योतश्च महाबलः ॥”)

प्रद्योतनः, पुं, (प्रद्योतते इति । प्र+द्युत्+“अनुदात्तेतश्च हलादेः ।” ३।२।१४९ । इति युच् ।) सूर्य्यः । इति हलायुधः ॥ (भावे ल्युट् ।) द्युतौ, क्ली ॥

प्रद्रावः, पुं, (प्र+द्रु+“प्रे द्रुस्तुस्रुवः ।” ३।३।२७। इति घञ् ।) पलायनम् । इत्यमरः । २ । ८ । ११२ ॥

प्रधनं, क्ली, (प्रदधातीति । प्र+धा+“कृपृवृजिमन्दिनिधाञ्भ्यः क्युः ।” उणा० २ । ८१ । इति बाहुलकात् क्युः आतो लोपश्च ।) युद्धम् । इत्यमरः । २ । ८ । १०३ ॥ (यथा, देवीभागवते । ४ । ७ । ५३ ।
“वैरं भवति वित्तार्थं दारार्थं वा परस्परम् ।
एवमारहितौ कस्मात् चक्रतुः प्रधनं महत् ॥”)
दारणम् । इति मेदिनी । ने, ८३ ॥ (प्रकृष्टं धनमस्येति विग्रहे प्रभूतधनविशिष्टे, त्रि ॥)

प्रधानं, क्ली, (प्रधत्ते सर्व्वमात्मनीति । प्र+धा+ल्युट् ।) प्रकृतिः । (यथा, विष्णुपुराणे ।१।२।२।
“यदक्षरं ब्रह्म य ईश्वरः पुमान्
गुणोर्म्मिसर्गस्थितिकालसंलयः ।
प्रधानबुद्ध्यादिजगत् प्रपञ्चसूः
स नोऽस्तु विष्णुर्मतिभूतिमुक्तिदः ॥”
महामात्रः । (यथा, मनुः । ७ । २०२ ।
“प्रमाणानि च कुर्व्वीत तेषां धर्म्यान् यथोदितान् ।
रत्नैश्च पूजयेदेनं प्रधानपुरुषैः सह ॥”
प्रधत्तेऽनेनाक्षिन् वा । प्र+धा+ल्युट् ।) परमात्मा । बुद्धिः । त्रि, प्रशस्तम् । तत्पर्य्यायः । प्रमुखम् २ प्रवेकम् ३ अनुत्तमम् ४ उत्तमम् ५ मुख्यम् ६ वर्य्यम् ७ वरेण्यम् ८ प्रवर्हम् ९ अनवरार्द्ध्यम् १० परार्द्ध्यम् ११ अग्र्यम् १२ प्राग्रहरम् १३ प्राग्र्यम् १४ अग्र्यम् १५ अग्रीयम् १६ अग्रिमम् १७ । इत्यमरः ।३।१।५७॥ (यथा, मनुः । ८ । १२१ ।
“उपसर्ज्जनं प्रधानस्य धर्म्मतो नोपपद्यते ।
पिता प्रधानं प्रजने तस्माद्धर्म्मेण तं भजेत् ॥”

प्रधानः, पुं, (प्रधत्ते इति । प्र+धा+ल्युः ।) महामात्रः । सेनापत्यादिः । महामात्रः प्रधानः स्यादिति पुंस्काण्डे वोपालितः । इति भरतटीकायां भरतः ॥ (राजविशेषः । यथा, महाभारते । १२ । २३० । १८१ ।
“प्रधानो नाम राजा च यत्नं ते श्रोत्रमागतः ।
कुले तस्य समुत्पन्नां सुलभां नाम विद्धि माम् ॥”)

प्रधिः, पुं, (प्रधीयते अनेनेति । प्र+धा+“उपसर्गे घोः किः ।” ३ । ३ । ९२ । इति किः ।) नेमिः । इत्यमरः । २ । ८ । ५६ ॥ (यथा, महाभारते । ५ । ५१ । ५८ ।
“मन्ये पर्य्यायधर्म्मोऽयं कालस्यात्यन्तगामिनः ।
चक्रे प्रधिरिवासक्तो नास्य शक्यं पलायितुम् ॥”)

प्रधीः, त्रि, (प्रकृष्टा धीर्बुद्धिर्यस्य ।) प्रकृष्टबुद्धियुक्तः । (प्रकृष्टा धीः ।) प्रकृष्टबुद्धौ, स्त्री । इति मुग्धबोधव्याकरणम् ॥

प्रधूपिता, स्त्री, (प्रकर्षेण धूपिता ।) क्लेशिता । सूर्य्यगन्तव्यदिक् । इति मेदिनी । ते, २०७ ॥ प्रकर्षेण तप्ते दीप्ते च त्रि ॥

प्रनष्टः, त्रि, (प्र+नश्+क्तः ।) प्रकर्षेण नाशयुक्तः ।
“कच्चिदज्ञानसम्मूढः प्रनष्टस्ते धनञ्जय ! ॥”
इति श्रीभगवद्गीतायाम् १८ अध्यायः ॥

प्रनिघातनं, क्ली, (प्र+नि+हन्+णिच्+भावे ल्युट् ।) प्रणिघातनम् । वधः । इति हेमचन्द्रः ॥

प्रपञ्चः, पुं, (प्रपञ्च्यते इति । प्र+पचि व्यक्तीकरणे+घञ् ।) विपर्य्यासः । विस्तारः । इत्यमरः ॥
“विपर्य्यासो वैपरीत्यं भ्रमो वा मायेति स्वामी ॥”
इति भरतः ॥ सञ्चयः । प्रतारणम् । इति मेदिनी । चे, १५ ॥ संसारः । यथा,—
“पादुकापञ्चकस्तोत्रं पञ्चवक्त्राद्विनिर्गतम् ।
षडाम्नायफलोपेतं प्रपञ्चे चातिदुर्लभम् ॥”
इति गुरुपादुकास्तोत्रम् ॥

प्रपञ्चितं, त्रि, (प्रपञ्च्यते स्मेति । प्र+पचि+क्तः ।) विस्तृतम् । भ्रमयुक्तम् । यथा,—
“आत्मानमेवात्मतया विजानतां
तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत् प्रलीयते
रज्ज्वामहेर्भोगभवाभवौ यथा ॥”
इति श्रीभागवते । १० । १४ । २५ ॥

प्रपथः, त्रि, (प्रकृष्टः पन्था यत्र ।) शिथिलः । इति भूरिप्रयोगः ॥ (प्रकृष्टः पन्था इति प्रादिसमासः । प्रकृष्टमार्गः । यथा ऋग्वेदे । १० । १७ । ४ ।
“आयुर्विश्वायुः परिपासति त्वा
पूषा त्वा पातु प्रपथे पुरस्तात् ॥”)

प्रपथ्या, स्त्री, (प्रकृष्टा पथ्येति प्रादिसमासः ।) हरीतकी । इति राजनिर्घण्टः ॥ (हरीतकीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

प्रपदं, क्ली, (प्रारब्धं प्रगतं वा पदमिति प्रादिसमासः ।) पादाग्रम् । इत्यमरः । २ । ६।७१॥ (यथा, मनौ । ६ । २२ ।
“भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः ॥”)

प्रपन्नः, त्रि, (प्रपद्यते स्मेति । प्र+पद्+क्तः ।) शरणागतः । यथा,—
“गोविन्दं पुण्डरीकाक्षमनन्तमजमव्ययम् ।
केशवञ्च प्रपन्नोऽस्मि किन्नो म्लृत्युः करिष्यति ॥”
इति मार्कण्डेयपुराणे म्लृत्युञ्जयो नाम७अध्यायः॥

प्रपन्नाड़ः, पुं (प्रपन्नं अलति भूषयतीति । प्रपन्न+अल्+“कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् । डलयोरैक्यम् ।) प्रपुन्नाड़ः । चक्रमर्द्दकः । इति रत्नमाला ॥ (विवृतिरस्य चक्रमर्द्दकशब्दे ज्ञेया ॥)

प्रपा, स्त्री, (प्रकर्षेण पिबन्त्यस्यामिति । प्र+पा+“आतश्चोपसर्गे ।” ३ । ३ । १०६ । इत्यङ् । घञर्थे को वा ।) पानीयशालिका । इत्यमरः । २ । २ । ७ ॥ (यथा, मनुः । ८ । ३१९ ।
“यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥”)
यज्ञशाला । यथा, रामायणे । १ । ७३ । २० ।
“विश्वामित्रं पुरस्कृत्य शतानन्दञ्च धार्म्मिकम् ।
प्रपामध्ये तु विधिवद्वेदिं कृत्वा महातपाः ॥”
“प्रपामध्ये यज्ञशालामध्ये इति कतकः ।” इति तट्टीकायां रामानुजः ॥)

प्रपाणिः, पुं, (प्रकृष्टः पाणिः । प्रादिसमासः ।) करस्याधोदेशः । पाणितलम् । इति राजनिर्घण्टः ॥ (विषयोऽस्य यथा, “पञ्चदशाङ्गुलौ प्रपाणी ।” इति चरके विमानेऽष्टमेऽध्याये ॥)

प्रपातः, पुं, (प्रपतत्यस्मादिति । प्र+पत्+“अकर्त्तरि च कारके संज्ञायाम् ।” ३ । ३ । १९ । इति घञ् ।) निरवलम्बनपर्व्वतादिपार्श्वम् । आरड़ि इति ख्यातम् । यस्मात् पतने अवस्थानक्रियाविशेषो नास्ति । तत्पर्य्यायः । अतटः २ भृगुः ३ । इत्यमरः । २ । ३ । ४ ॥ (यथा, देवीभागवते । ४ । ७ । ४६ ।
“मधु पश्यति मूढ़ात्मा प्रपातं नैव पश्यति ।
करोति निन्दितं कर्म्म नरकात् न बिभेति च ॥”)
निर्झरः । इति मेदिनी । ते, १२७ । (भावे घञ् ।) अभ्यवस्कन्दः । कूलम् । इति हेमचन्द्रः ॥ (उड्डीनगतिविशेषः । यथा, महाभारते । ८ । ४१ । “अहं सम्पातादिकानष्टोत्तरशतम् उड्डीनगतिविशेषान् वेद्मि । उक्तञ्च ।
सम्पातञ्च प्रपातञ्च महापातं निपातनम् ।
वक्रं तिर्य्यक् तथा चोर्द्ध्वमष्टमं लघुसंज्ञकम् ॥”
प्रपातनम् । यथा, सुश्रुते चिकित्सितस्थाने । ४० अध्याये ।
“तत्तु नस्यं देयं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्य शोषावबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु इति ॥”)

प्रपायी, [ ] त्रि, (प्रपिबतीति । प्र+पा+णिनिः ।) पानकर्त्ता । रक्षणकर्त्ता । इति मुग्धबोधव्याकरणम् ॥